# Parvati Vallabha Nilakantha Ashtakam

# પાર્વતીવલ્લભનીલકણ્ઠાષ્ટકમ્

## Document Information

Text title : Parvativallabha Nilakantha Ashtakam

File name : pArvatIvallabhanIlakaMThAShTakam.itx

Category : shiva, aShTaka

Location : doc_shiva

Proofread by : NA, PSA Easwaran

Latest update : February 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 17, 2024

*sanskritdocuments.org*

Parvati Vallabha Nilakantha Ashtakam

# પાર્વતીવલ્લભનીલકણ્ઠાષ્ટકમ્

નમો ભૂતનાથં નમો દેવદેવં
નમઃ કાલકાલં નમો દિવ્યતેજઃ । (દિવ્યતેજમ્)
નમઃ કામભસ્મં નમશ્શાન્તશીલં
ભજે પાર્વતીવલ્લભં નીલકણ્ઠમ્ ॥ ૧॥

સદા તીર્થસિદ્ધં સદા ભક્તરક્ષં
સદા શૈવપૂજ્યં સદા શુભ્રભસ્મમ્ ।
સદા ધ્યાનયુક્તં સદા જ્ઞાનતલ્પં
ભજે પાર્વતીવલ્લભં નીલકણ્ઠમ્ ॥ ૨॥

શ્મશાને શયાનં મહાસ્થાનવાસં (શ્મશાનં ભયાનં)
શરીરં ગજાનં સદા ચર્મવેષ્ટમ્ ।
પિશાચાદિનાથં પશૂનાં પ્રતિષ્ઠં (પિશાચં નિશોચં પશૂનાં)
ભજે પાર્વતીવલ્લભં નીલકણ્ઠમ્ ॥ ૩॥

ફણીનાગકણ્ઠે ભુજઙ્ગાદ્યનેકં (ફણીનાગકણ્ઠં, ભુજઙ્ગાઙ્ગભૂષં)
ગલે રુણ્ડમાલં મહાવીર શૂરમ્ ।
કટિવ્યાઘ્રચર્મં ચિતાભસ્મલેપં
ભજે પાર્વતીવલ્લભં નીલકણ્ઠમ્ ॥ ૪॥

શિરશ્શુદ્ધગઙ્ગા શિવાવામભાગં
બૃહદ્દીર્ઘકેશં સદા માં ત્રિનેત્રમ્ । (વિયદ્દીર્ઘકેશં, બૃહદ્દિવ્યકેશં સહોમં)
ફણીનાગકર્ણં સદા ભાલચન્દ્રં (બાલચન્દ્રં)
ભજે પાર્વતીવલ્લભં નીલકણ્ઠમ્ ॥ ૫॥

કરે શૂલધારં મહાકષ્ટનાશં
સુરેશં પરેશં મહેશં જનેશમ્ । (વરેશં મહેશં)
ધનેશસ્તુતેશં ધ્વજેશં ગિરીશં (ધને ચારુ ઈશં, ધનેશસ્ય મિત્રં)
ભજે પાર્વતીવલ્લભં નીલકણ્ઠમ્ ॥ ૬॥

ઉદાનં સુદાસં સુકૈલાસવાસં (ઉદાસં)
ધરા નિર્ધરં સંસ્થિતં હ્યાદિદેવમ્ । (ધરાનિર્ઝરે)
અજં હેમકલ્પદ્રુમં કલ્પસેવ્યં
ભજે પાર્વતીવલ્લભં નીલકણ્ઠમ્ ॥ ૭॥

મુનીનાં વરેણ્યં ગુણં રૂપવર્ણં
દ્વિજાનં પઠન્તં શિવં વેદશાસ્ત્રમ્ । (દ્વિજા સમ્પઠન્તં, દ્વિજૈઃ સ્તૂયમાનં, વેદશાત્રૈઃ)
અહો દીનવત્સં કૃપાલું શિવં તં (શિવં હિ)
ભજે પાર્વતીવલ્લભં નીલકણ્ઠમ્ ॥ ૮॥

સદા ભાવનાથં સદા સેવ્યમાનં
સદા ભક્તિદેવં સદા પૂજ્યમાનમ્ ।
મયા તીર્થવાસં સદા સેવ્યમેકં (મહાતીર્થવાસમ્)
ભજે પાર્વતીવલ્લભં નીલકણ્ઠમ્ ॥ ૯॥

ઇતિ પાર્વતીવલ્લભનીલકણ્ઠાષ્ટકં સમ્પૂર્ણમ્ ।

॥ શુભમસ્તુ ॥

Variations are given in parenthesis on the right side.

NA, PSA Easwaran

*Parvati Vallabha Nilakantha Ashtakam*

pdf was typeset on February 17, 2024

Please send corrections to *sanskrit@cheerful.com*